# shrI mUkAmbikA divyasahasranAmastotram

# શ્રીમૂકામ્બિકા દિવ્યસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : shrii muukaambikaa divyasahasranaamastotram

File name : mUkAmbikA1000str.itx

Category : sahasranAma, devii, otherforms, stotra, devI

Location : doc_devii

Author : Traditional

Transliterated by : R. Harshananda

Proofread by : R. Harshananda, NA

Description-comments : mookambika sahasranaama stotram. See corresponding nAmAvaliH

Latest update : December 17, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 18, 2022

*sanskritdocuments.org*

# shrI mUkAmbikA divyasahasranAmastotram

# શ્રીમૂકામ્બિકા દિવ્યસહસ્રનામસ્તોત્રમ્

This beautiful Sahasranama of Shri Mukambika Devi is taken from the chapter called Kolapura MAhAtmyam of Skanda Mahapurana. This is a very powerful hymn and a single repetition of this hymn is said to be equal to SahasraChandi Homa. Shri MukAmbika is the combination of not only the three prime deities Mahakali, MahalakShmi, and Mahasarasvati, but also all the other forms of Shridevi like Kaushiki, Mahishamardini, ShatakShi, and all other gods and goddesses. By simply chanting this great hymn, one can please all the three hundred crores of devas who reside in Shridevi. This is a lesser known hymn probably because it was handed over from a Guru to Shishya, during the initiation into the Mulamantra of Shri MukAmbika, known as Gauri PanchadashAkShari. Sage Markandeya says that this hymn is of indescribable glory and should never be given to the ignorant who do not worship Shridevi and those who are not initiated into the secrets of KulAchAra! Please use it with proper discernment. – Harshanand

સૂત ઉવાચ ।
પુરા કૈલાસશિખરે માર્કણ્ડેયો મહામુનિઃ ।
પપ્રચ્છ ગિરિજાનાથં સિદ્ધગન્ધર્વસેવિતમ્ ॥ ૧॥

સહસ્રાર્કપ્રતીકાશં ત્રિનેત્રં ચન્દ્રશેખરં ।
ભગવત્યા કૃતં કર્મ દાનવાનાં રણે કથમ્ ॥ ૨॥

શ્રી શિવ ઉવાચ ।
શ્ૃણુ વત્સ પ્રવક્ષ્યામિ યન્માં ત્વં પરિપૃચ્છસિ ।
ત્રિગુણા શ્રીર્મહાલક્ષ્મીઃ ષોડસૌભાગ્યવતી પરા ॥ ૩॥

યોગનિદ્રાનિમગ્નસ્ય વિષ્ણોરમિતતેજસઃ ।
પિન્ડજૂષતત્સમુદ્ભૂતૌ વિખ્યાતૌ મધુકૈટભૌ ॥ ૪॥

તયોઃ વિષ્ણોરભૂદ્ભૂયો યુદ્ધં સાર્વભયઙ્કરમ્ ।
ચક્રિણા નિહતાવેતૌ મહામાયાવિમોહિતૌ ॥ ૫॥

અથ દેવશરીરેભ્યઃ પ્રાદુર્ભૂતા મહેશ્વરી ।
મહિષં સા મહાવીર્યં અવધીન્નામરૂપકમ્ ॥ ૬॥

તતો દૈત્યાર્દિતૈઃ દેવૈઃ પુરુહૂતાદિભિઃ સ્તુતા ।
સૈષા ભગવતી દૈત્યં ધૂમ્રલોચનસંજ્ઞિતમ્ ॥ ૭॥

ચણ્ડમુણ્ડૌ મહાવીર્યૌ રક્તબીજં ભયઙ્કરમ્ ।
નિહત્ય દેવી દૈત્યેન્દ્રં નિશુમ્ભમુરુવિક્રમમ્ ॥ ૮॥

શુમ્ભાસુરં મહાવીર્યં દેવતામૃત્યુરૂપિણમ્ ।
યુધ્યમાનં સસૈન્યં તં અવધીદમ્બિકા પુનઃ ॥ ૯॥

દેવાશ્ચ ઋષયઃ સિદ્ધાઃ ગન્ધર્વાશ્ચ મુદા તદા ।
તુષ્ટુવુઃ ભક્તિનમ્રાત્મમૂર્તયઃ પરમેશ્વરીમ્ ॥ ૧૦॥

સૂત ઉવાચ ।
એતચ્છ્રુત્વા શિવોક્તં તત્ માર્કણ્ડેયો મહામુનિઃ ।
પદ્મૈર્નામ્નાં સહસ્રેણ પૂજયામાસ તાં શિવામ્ ॥ ૧૧॥

ૐ અસ્યશ્રી મૂકામ્બિકાયાઃ
વરદિવ્યસહસ્રનામસ્તોત્રમાલામહામન્ત્રસ્ય
માર્કણ્ડેય ભગવાન્ ઋષિઃ - ગાયત્રી છન્દઃ -
ત્રિમૂર્ત્યૈક્યસ્વરૂપિણી મહાકાલી-મહાલક્ષ્મી-મહાસરસ્વતી
ત્રિગુણાત્મિકા શ્રી મૂકામ્બિકા દેવતા -
હ્રાં બીજં - હ્રીં શક્તિઃ - હૂં કીલકં -
શ્રી મૂકામ્બિકા વરપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

(હ્રાં ઇત્યાદિ વા મૂકામ્બિકાયાઃ ગૌરી પઞ્ચદશાક્ષર્યાખ્યા
બાલકુમારિકા વિદ્યયા વા ન્યાસમાચરેત્)

ધ્યાનમ્ -
શૈલાધિરાજતનયાં શરદિન્દુકોટિ-
ભાસ્વન્ મુખામ્બુજકિરીટયુતાં ત્રિનેત્રામ્ ।

શઙ્ખાર્યભીતિવરવર્યકરાં મનોજ્ઞાં
મૂકામ્બિકાં મુનિસુરાઽભયદાં સ્મરામિ ॥ ૧॥

પ્રમત્ત મધુકૈટભૌ મહિષદાનવં ચાઽવધીત્
સધૂમ્રનયનાહ્વયૌ સબલચણ્ડમુણ્ડાવપિ ।
સરક્તદનુજૌ ભયઙ્કરનિશુમ્ભશુમ્ભાસુરૌ અસૌ ।
ભગવતી સદા હૃદિ વિભાતુ મૂકામ્બિકા ॥ ૨॥

પ્રપન્નજનકામદાં પ્રબલમૂકદર્પાપહાં
અનુષ્ણસુકલાધરાં અરિદરાભયેષ્ટાન્વિતામ્ ।
તટિદ્દ્વિસરભાસુરાં કુટજશૈલમૂલાશ્રિતાં ।
અશેષવિભુધાત્મિકાં અનુભજામિ મૂકામ્બિકામ્ ॥ ૩॥

॥ લમિત્યાદિ પઞ્ચપૂજા ॥

શ્રી માર્કણ્ડેય ઉવાચ ।
શ્રીં હ્રીં ઐં ૐ ।
ૐ મૂકામ્બિકા મૂકમાતા મૂકવાગ્ભૂતિદાયિની ।
મહાલક્ષ્મીઃ મહાદેવી મહારાજ્યપ્રદાયિની ॥ ૧॥

મહોદયા મહારૂપા માન્યા મહિતવિક્રમા ।
મનુવન્દ્યા મહેષ્વાસા મન્ત્રિવર્યા મનસ્વિની ॥ ૨॥

મેનકાતનયા માતા મહિતા માતૃપૂજિતા ।
મહતી મારજનની મૃતસઞ્જીવિની મતિઃ ॥ ૩॥

મહનીયા મદોલ્લાસા મન્દારકુસુમપ્રભા ।
માધવી મલ્લિકાપૂજ્યા મલયાચલવાસિની ॥ ૪॥

મહાઙ્કુભગિની મૂર્તા મહાસારસ્વતપ્રદા ।
મર્ત્યલોકાશ્રયા મન્યુઃ મતિદા મોક્ષદાયિની ॥ ૫॥

મહાપૂજ્યા મખફલપ્રદા મઘવદાશ્રયા ।
મરીચિમારુતપ્રાણાઃ મનુજ્યેષ્ઠા મહૌષધિઃ ॥ ૬॥

મહાકારુણિકા મુક્તાભરણા મઙ્ગલપ્રદા ।
મણિમાણિક્યશોભાઢ્યા મદહીના મદોત્કટા ॥ ૭॥

મહાભાગ્યવતી મન્દસ્મિતા મન્મથસેવિતા ।

માયાવિદ્યામયી મઞ્જુભાષિણી મદલાલસા ॥ ૮॥

મૃડાણી મૃત્યુમથિની મૃદુભાષા મૃડપ્રિયા ।
મન્ત્રજ્ઞા મિત્રસઙ્કાશા મુનિઃ મહિષમર્દિની ॥ ૯॥

મહોદયા મહોરસ્કા મૃગદૃષ્ટિઃ મહેશ્વરી ।
મૃનાલશીતલા મૃત્યુઃ મેરુમન્દરવાસિની ॥ ૧૦॥

મેધ્યા માતઙ્ગગમના મહામારીસ્વરૂપિણી ।
મેઘશ્યામા મેઘનાદા મીનાક્ષી મદનાકૃતિઃ ॥ ૧૧॥

મનોન્મયી મહામાયા મહિષાસુરમોક્ષદા ।
મેનકાવન્દિતા મેન્યા મુનિવન્દિતપાદુકા ॥ ૧૨॥

મૃત્યુવન્ધ્યા મૃત્યુદાત્રી મોહિની મિથુનાકૃતિઃ ।
મહારૂપા મોહિતાઙ્ગી મુનિમાનસસંસ્થિતા ॥ ૧૩॥

મોહનાકારવદના મુસલાયુધધારિણી ।
મરીચિમાલા માણિક્યભૂષણા મન્દગામિની ॥ ૧૪॥

મહિષી મારુતગતિઃ મહાલાવણ્યશાલિની ।
મૃદઙ્ગનાદિની મૈત્રી મદિરામોદલાલસા ॥ ૧૫॥

માયામયી મોહનાશા મુનિમાનસમન્દિરા ।
માર્તાણ્ડકોટિકિરણા મિથ્યાજ્ઞાનનિવારિણી ॥ ૧૬॥

મૃગાઙ્કવદના માર્ગદાયિની મૃગનાભિધૃક્ ।
મન્દમારુતસંસેવ્યા મન્દારતરુમૂલગા ॥ ૧૭॥

મન્દહાસા મદકરી મધુપાનસમુદ્યતા મધુરા ।
માધવનુતા માધવી માધવાર્ચિતા ॥ ૧૮॥

માર્તાણ્ડકોટિજનની માર્તાણ્ડગતિદાયિની ।
મૃણાલમૂર્તિઃ માયાવી મહાસામ્રાજ્યદાયિની ॥ ૧૯॥

કાન્તા કાન્તમુખી કાલી કચનિર્જિતભૃઙ્ગિકા ।
કઞ્જાક્ષી કઞ્જવદના કસ્તૂરીતિલકોજ્જ્વલા ॥ ૨૦॥

કલિકાકારવદના કર્પૂરામોદસંયુતા ।
કોકિલાલાપસઙ્ગીતા કનકાકૃતિબિમ્બભૃત્ ॥ ૨૧॥

કમ્બુકણ્ઠી કઞ્જહારા કલિદોષવિનાશિની ।
કઞ્ચુકાઢ્યા કઞ્જરૂપા કાઞ્ચીભૂષણરાજિતા ॥ ૨૨॥

કણ્ઠીરવજિતામધ્યા કાઞ્ચીદામવિભૂષિતા ।
કૃતકિઙ્કિણિકાશોભા કાઞ્ચનસ્રાવિનીવિકા ॥ ૨૩॥

કાઞ્ચનોત્તમશોભાઢ્યા કનકાક્લૃપ્તપાદુકા ।
કણ્ઠીરવસમાસીના કણ્ઠીરવપરાક્રમા ॥ ૨૪॥

કલ્યાણી કમલા કામ્યા કમનીયા કલાવતી ।
કૃતિઃ કલ્પતરુઃ કીર્તિઃ કુટજાચલવાસિની ॥ ૨૫॥

કવિપ્રિયા કાવ્યલોલા કપર્દીરુચિરાકૃતિઃ ।
કણ્ઠીરવધ્વજા કામરૂપા કામિતદાયિની ॥ ૨૬॥

કૃષાણુઃ કેશવનુતા કૃતપ્રજ્ઞા કૃશોદરી ।
કોશાધીશ્વરસંસેવ્યા કૃશાકર્ષિતપાતકા ॥ ૨૭॥

કરીન્દ્રગામિની કેળી કુમારી કલભાષિણી ।
કલિદોષહરા કાષ્ઠા કરવીરસુમપ્રિયા ॥ ૨૮॥ (કરવીરસુમપ્રભા)

કલારૂપા કૃષ્ણનુતા કલાધરસુપૂજિતા ।
કુબ્જા કઞ્જેક્ષણા કન્યા કલાધરમુખા કવિઃ ॥ ૨૯॥

કલા કલાઙ્ગી કાવેરી કૌમુદી કાલરૂપિણી ।
કલાઢ્યા કોલસંહર્ત્રી કુસુમાઢ્યા કુલાઙ્ગના ॥ ૩૦॥

કુચોન્નતા કુઙ્કુમાઢ્યા કૌસુમ્ભકુસુમપ્રિયા ।
કુચશોભા કાલરાત્રિઃ કીચકારણ્યસેવિતા ॥ ૩૧॥

કુષ્ઠરોગહરા કૂર્મપૃષ્ઠા કામિતવિગ્રહા ।
કલાનના કલાલાપા કલાભાધીશ્વરાર્ચિતા ॥ ૩૨॥

કેતકીકુસુમપ્રીતા કૈલાસપદદાયિની ।
કપર્દિની કલામાલા કેશવાર્ચિતપાદુકા ॥ ૩૩॥

કુશાત્મજા કેશપાશા કોલાપુરનિવાસિની ।
કોશનાથા ક્લેશહન્ત્રી કીશસેવ્યા કૃપાપરા ॥ ૩૪॥

કૌન્તેયાર્ચિતપાદાબ્જા કાલિન્દી કુમુદાલયા ।
કનત્કનકતાટઙ્કા કરિણી કુમુદેક્ષણા ॥ ૩૫॥

કોકસ્તની કુન્દરદના કુલમાર્ગપ્રવર્તિની ।
કુબેરપૂજિતા સ્કન્દમાતા કીલાલશીતલા ॥ ૩૬॥

કાલી કામકલા કાશી કાશપુષ્પસમપ્રભા ।
કિન્નરી કુમુદાહ્લાદકારિણી કપિલાકૃતિઃ ॥ ૩૭॥

કાર્યકારણનિર્મુક્તા કૃમિકીટાન્તમોક્ષદા ।
કિરાતવનિતા કાન્તિઃ કાર્યકારણરૂપિણી ॥ ૩૮॥

કપિલા કપિલારાધ્યા કપીશધ્વજસેવિતા ।
કરાલી કાર્તિકેયાખ્યજનની કાન્તવિગ્રહા ॥ ૩૯॥

કરભોરુઃ કરેણુશ્રીઃ કપાલિપ્રીતિદાયિની ।
કોલર્ષિવરસંસેવ્યા કૃતજ્ઞા કાઙ્ક્ષિતાર્થદા ॥ ૪૦॥

બાલા બાલનિભા બાણધારિણી બાણપૂજિતા ।
બિસપ્રસૂનનયના બિસતન્તુનિભાકૃતિઃ ॥ ૪૧॥

બહુપ્રદા બહુબલા બાલાદિત્યસમપ્રભા ।
બલાધરહિતા બિન્દુનિલયા બગલામુખી ॥ ૪૨॥

બદરીફલવક્ષોજા બાહ્યદમ્ભવિવર્જિતા ।
બલા બલપ્રિયા બન્ધુઃ બન્ધા બૌદ્ધા બુધેશ્વરી ॥ ૪૩॥ (બુધા બૌદ્ધા)

બિલ્વપ્રિયા બાલલતા બાલચન્દ્રવિભૂષિતા ।
બુદ્ધિદા બન્ધનચ્છેત્રી બન્ધૂકકુસુમપ્રિયા ॥ ૪૪॥

બ્રાહ્મી બ્રહ્મનુતા બ્રધ્નતનયા બ્રહ્મચારિણી ।
બૃહસ્પતિસમારાધ્યા બુધાર્ચિતપદામ્બુજા ॥ ૪૫॥

બૃહત્કુક્ષિઃ બૃહદ્વાણી બૃહત્પૃષ્ઠા બિલેશયા ।
બર્હિધ્વજસુતા બર્હિકચા બીજાશ્રયા બલા ॥ ૪૬॥

બિન્દુરૂપા બીજાપૂરપ્રિયા બાલેન્દુશેખરા ।
બિજાઙ્કુરોદ્ભવા બીજરૂપિણી બ્રહ્મરૂપિણી ॥ ૪૭॥

બોધરૂપા બૃહદ્રૂપા બન્ધિની બન્ધમોચિની ।
બિમ્બસંસ્થા બાલરૂપા બાલરાત્રીશધારિણી ॥ ૪૮॥

વનદુર્ગા વહ્નિનૌકા શ્રીવન્ધ્યા વનસંસ્થિતા ।

વહ્નિતેજા વહ્નિશક્તિઃ વનિતારત્નરૂપિણી ॥ ૪૯॥

વસુન્ધરા વસુમતી વસુધા વસુદાયિની ।
વાસવાદિસુરારાધ્યા વન્ધ્યતાવિનિવર્તિની ॥ ૫૦॥

વિવેકિની વિશેષજ્ઞા વિષ્ણુઃ વૈષ્ણવપૂજિતા ।
પણ્ડિતાખિલદૈત્યારિઃ વિજયા વિજયપ્રદા ॥ ૫૧॥

વિલાસિની વેદવેદ્યા વિયત્પૂજ્યા વિશાલિની ।
વિશ્વેશ્વરી વિશ્વરૂપા વિશ્વસૃષ્ટિવિધાયિની ॥ ૫૨॥

વીરપત્ની વીરમાતા વીરલોકપ્રદાયિની ।
વરપ્રદા વર્યપદા વૈષ્ણવશ્રીઃ વધૂવરા ॥ ૫૩॥ (વીર્યપ્રદા)

વધૂઃ વારિધિસઞ્જાતા વારણાદિસુસંસ્થિતા ।
વામભાગાધિકા વામા વામમાર્ગવિશારદા ॥ ૫૪॥

વામિની વજિસંસેવ્યા વજ્રાદ્યાયુધધારિણી ।
વશ્યા વેદ્યા વિશ્વરૂપા વિશ્વવન્દ્યા વિમોહિની ॥ ૫૫॥

વિદ્વદ્રૂપા વજ્રનખા વયોવસ્થાવિવર્જિતા ।
વિરોધશમની વિદ્યા વારિતૌઘા વિભૂતિદા ॥ ૫૬॥

વિશ્વાત્મિકા વિશ્વપાશમોચિની વારણસ્થિતા ।
વિબુધાર્ચ્યા વિશ્વવન્દ્યા વિશ્વભ્રમણકારિણી ॥ ૫૭॥

વિલક્ષણા વિશાલાક્ષી વિશ્વામિત્રવરપ્રદા ।
વિરૂપાક્ષપ્રિયા વારિજાક્ષી વારિજસમ્ભવા ॥ ૫૮॥

વાઙ્ગ્મયી વાક્પતિઃ વાયુરૂપા વારણગામિની ।
વાર્ધિગમ્ભીરગમના વારિજાક્ષસતી વરા ॥ ૫૯॥

વિષયા વિષયાસક્તા વિદ્યાઽવિદ્યાસ્વરૂપિણી ।
વીણાધારી વિપ્રપૂજ્યા વિજયા વિજયાન્વિતા ॥ ૬૦॥

વિવેકજ્ઞા વિધિસ્તુતા વિશુધ્દા વિજયાર્ચિતા ।
વૈધવ્યનાશિની વૈવાહિતા વિશ્વવિલાસિની ॥ ૬૧॥

વિશેષમાનદા વૈદ્યા વિબુધાર્તિવિનાશિની ।
વિપુલશ્રોણિજઘના વલિત્રયવિરાજિતા ॥ ૬૨॥

વિજયશ્રીઃ વિધુમુખી વિચિત્રાભરણાન્વિતા ।
વિપક્ષવ્રાતસંહર્ત્રી વિપત્સંહારકારિણી ॥ ૬૩॥

વિદ્યાધરા વિશ્વમયી વિરજા વીરસંસ્તુતા ।
વેદમૂર્તિઃ વેદસારા વેદભાષાવિચક્ષણા ॥ ૬૪॥

વિચિત્રવસ્ત્રાભરણા વિભૂષિતશરીરિણી ।
વીણાગાયનસંયુક્તા વીતરાગા વસુપ્રદા ॥ ૬૫॥ (વીણાગાયનસંસક્તા)

વિરાગિણી વિશ્વસારા વિશ્વાવસ્થાવિવર્જિતા ।
વિભાવસુઃ વયોવૃધ્દા વાચ્યવાચકરૂપિણી ॥ ૬૬॥

વૃત્રહન્ત્રી વૃત્તિદાત્રી વાક્સ્વરૂપા વિરાજિતા ।
વ્રતકાર્યા વજ્રહસ્તા વ્રતશીલા વ્રતાન્વિતા ॥ ૬૭॥

વ્રતાત્મિકા વ્રતફલા વ્રતષાડ્ગુણ્યકારિણી ।
વૃત્તિઃ વાદાત્મિકા વૃત્તિપ્રદા વર્યા વષટ્કૃતા ॥ ૬૮॥

વિજ્ઞાત્રી વિબુધા વેદ્યા વિભાવસુસમદ્યુતિઃ । (વિભવા વેદ્યા)
વિશ્વવેદ્યા વિરોધઘ્ની વિબુધસ્તોમજીવના ॥ ૬૯॥

વીરસ્તુત્યા વિયદ્યાના વિજ્ઞાનઘનરૂપિણી ।
વરવાણી વિશુધ્દાન્તઃકરણા વિશ્વમોહિની ॥ ૭૦॥

વાગીશ્વરી વાગ્વિભૂતિદાયિની વારિજાનના ।
વારુણીમદરક્તાક્ષી વામમાર્ગપ્રવર્તિની ॥ ૭૧॥

વામનેત્રા વિરાડ્રૂપા વેત્રાસુરનિષૂદિની ।
વાક્યાર્થજ્ઞાનસન્ધાત્રી વાગધિષ્ઠાનદેવતા ॥ ૭૨॥

વૈષ્ણવી વિશ્વજનની વિષ્ણુમાયા વરાનના ।
વિશ્વમ્ભરી વીતિહોત્રા વિશ્વેશ્વરવિમોહિની ॥ ૭૩॥

વિશ્વપ્રિયા વિશ્વકર્ત્રી વિશ્વપાલનતત્પરા ।
વિશ્વહન્ત્રી વિનોદાઢ્યા વીરમાતા વનપ્રિયા ॥ ૭૪॥

વરદાત્રી વીતપાનરતા વીરનિબર્હિણી ।
વિદ્યુન્નિભા વીતરોગા વન્દ્યા વિગતકલ્મષા ॥ ૭૫॥ (વીતરોગા વિદ્યા)

વિજિતાખિલપાષણ્ડા વીરચૈતન્યવિગ્રહા ।
રમા રક્ષાકરી રમ્યા રમણીયા રણપ્રિયા ॥ ૭૬॥

રક્ષાપરા રાક્ષસઘ્ની રાજ્ઞી રમણરાજિતા ।
રાકેન્દુવદના રુદ્રા રુદ્રાણી રૌદ્રવર્જિતા ॥ ૭૭॥

રુદ્રાક્ષધારિણી રોગહારિણી રઙ્ગનાયિકા ।
રાજ્યશ્રીરઞ્જિતપદા રાજરાજનિષેવિતા ॥ ૭૮॥

રુચિરા રોચના રોચી ઋણમોચનકારિણી ।
રજનીશકલાયુક્તા રજતાદ્રિનિકેતના ॥ ૭૯॥

રાગોષ્ઠી રાગહૃદયા રામા રાવણસેવિતા ।
રક્તબીજાર્દિની રક્તલોચના રાજ્યદાયિની ॥ ૮૦॥

રવિપ્રભા રતિકરા રત્નાઢ્યા રાજ્યવલ્લભા ।
રાજત્કુસુમધમ્મિલ્લા રાજરાજેશ્વરી રતિઃ ॥ ૮૧॥

રાધા રાધાર્ચિતા રૌદ્રી રણન્મઞ્જીરનૂપુરા ।
રાકારાત્રિઃ ઋજૂરાશિઃ રુદ્રદૂતી ઋગાત્મિકા ॥ ૮૨॥

રાજચ્ચન્દ્રજટાજૂટા રાકેન્દુમુખપઙ્કજા ।
રાવણારિહૃદાવાસા રાવણેશવિમોહિની ॥ ૮૩॥

રાજત્કનકકેયૂરા રાજત્કરજિતામ્બુજા ।
રાગહારયુતા રામસેવિતા રણપણ્ડિતા ॥ ૮૪॥

રમ્ભોરૂ રત્નકટકા રાજહંસગતાગતિઃ ।
રાજિવરઞ્જિતપદા રાજસિમ્હાસનસ્થિતા ॥ ૮૫॥

રક્ષાકરી રાજવન્દ્યા રક્ષોમણ્ડલભેદિની ।
દાક્ષાયણી દાન્તરૂપા દાનકૃત્ દાનવાર્દિની ॥ ૮૬॥

દારિદ્ર્યનાશિની દાત્રી દયાયુક્તા દુરાસદા ।
દુર્જયા દુઃખશમની દુર્ગદાત્રી દુરત્યયા ॥ ૮૭॥

દાસીકૃતામરા દેવમાતા દાક્ષિણ્યશાલિની ।
દૌર્ભાગ્યહારિણી દેવી દક્ષયજ્ઞવિનાશિની ॥ ૮૮॥

દયાકરી દીર્ઘબાહુઃ દૂતહન્ત્રી દિવિસ્થિતા ।
દયારૂપા દેવરાજસંસ્તુતા દગ્ધમન્મથા ॥ ૮૯॥

દિનકૃત્કોટિસઙ્કાશા દિવિષદ્દિવ્યવિગ્રહા ।

દીનચિન્તામણિઃ દિવ્યસ્વરૂપા દીક્ષિતાયિની ॥ ૯૦॥

દીધિતિઃ દીપમાલાઢ્યા દિક્પતિઃ દિવ્યલોચના ।
દુર્ગા દુઃખૌઘશમની દુરિતઘ્ની દુરાસદા ॥ ૯૧॥

દુર્જ્ઞેયા દુષ્ટશમની દુર્ગામૂર્તિઃ દિગીશ્વરી ।
દુરન્તાખ્યા દુષ્ટદાહ્યા દુર્ધર્ષા દુન્દુભિસ્વના ॥ ૯૨॥

દુષ્પ્રધર્ષા દુરારાધ્યા દુર્નીતિજનનિગ્રહા ।
દૂર્વાદલશ્યામલાઙ્ગી દ્રુતદૃગ્ધૂષણોજ્ઝિતા ॥ ૯૩॥

દેવતા દેવદેવેશી દેવી દેશિકવલ્લભા ।
દેવિકા દેવસર્વસ્વા દેશપ્રાદેશકારિણી ॥ ૯૪॥

દોષાપહા દોષદૂરા દોષાકરસમાનના ।
દોગ્ધ્રી દૌર્જન્યશમની દૌહિત્રપ્રતિપાદિની ॥ ૯૫॥

દૂત્યાદિક્રીડનપરા દ્યુમણિઃ દ્યૂતશાલિની ।
દ્યોતિતાશા દ્યૂતપરા દ્યાવાભૂમિવિહારિણી ॥ ૯૬॥ (દ્યુતવરા)

દન્તિની દણ્ડિની દંષ્ટ્રી દન્તશૂકવિષાપહા ।
દમ્ભદૂરા દન્તિસુતા દણ્ડમાત્રજયપ્રદા ॥ ૯૭॥

દર્વીકરા દશગ્રીવા દહનાર્ચિઃ દધિપ્રિયા ।
દધીચિવરદા દક્ષા દક્ષિણામૂર્તિરૂપિણી ॥ ૯૮॥

દાનશીલા દીર્ઘવર્ષ્મા દક્ષિણાર્ધેશ્વરા । (દીર્ઘવૃષ્ઠા)
દૃતા દાડિમીકુસુમપ્રીતા દુર્ગદુષ્કૃતહારિણી ॥ ૯૯॥

જયન્તી જનની જ્યોત્સ્ના જલજાક્ષી જયપ્રદા ।
જરા જરાયુજપ્રીતા જરામરણવર્જિતા ॥ ૧૦૦॥

જીવના જીવનકરી જીવેશ્વરવિરાજિતા ।
જગદ્યોનિઃ જનિહરા જાતવેદા જલાશ્રયા ॥ ૧૦૧॥

જિતામ્બરા જિતાહારા જિતાકારા જગત્પ્રિયા ।
જ્ઞાનપ્રિયા જ્ઞાનઘના જ્ઞાનવિજ્ઞાનકારિણી ॥ ૧૦૨॥

જ્ઞાનેશ્વરી જ્ઞાનગમ્યા જ્ઞાતાજ્ઞાતૌઘનાશિની ।
જિજ્ઞાસા જીર્ણરહિતા જ્ઞાનિની જ્ઞાનગોચરા ॥ ૧૦૩॥

અજ્ઞાનધ્વંસિની જ્ઞાનરૂપિણી જ્ઞાનકારિણી ।
જાતાર્તિશમની જન્મહારિણી જ્ઞાનપઞ્જરા ॥ ૧૦૪॥

જાતિહીના જગન્માતા જાબાલમુનિવન્દિતા ।
જાગરૂકા જગત્પાત્રી જગદ્વન્દ્યા જગદ્ગુરુઃ ॥ ૧૦૫॥

જલજાક્ષસતી જૈત્રી જગત્સંહારકારિણી ।
જિતક્રોધા જિતરતા જિતચન્દ્રમુખામ્બુજા ॥ ૧૦૬॥

યજ્ઞેશ્વરી યજ્ઞફલા યજના યમપૂજિતા ।
યતિઃ યોનિઃ યવનિકા યાયજૂકા યુગાત્મિકા ॥ ૧૦૭॥

યુગાકૃતિઃ યોગદાત્રી યજ્ઞા યુદ્ધવિશારદા ।
યુગ્મપ્રિયા યુક્તચિત્તા યત્નસાધ્યા યશસ્કરી ॥ ૧૦૮॥

યામિની યાતનહરા યોગનિદ્રા યતિપ્રિયા ।
યાતહૃતકમલા યજ્યા યજમાનસ્વરૂપિણી ॥ ૧૦૯॥

યક્ષેશી યક્ષહરણા યક્ષિણી યક્ષસેવિતા ।
યાદવસ્ત્રી યદુપતિઃ યમલાર્જુનભઞ્જના ॥ ૧૧૦॥

વ્યાલાલઙ્કારિણી વ્યાધિહારિણી વ્યયનાશિની ।
તિરસ્કૃતમહાવિદ્યા તિર્યક્પૃષ્ઠા તિરોહિતા ॥ ૧૧૧॥

તિલપુષ્પસમાકારનાસિકા તીર્થરૂપિણી ।
તિર્યગ્રૂપા તીર્થપાદા ત્રિવર્ગા ત્રિપુરેશ્વરી ॥ ૧૧૨॥

ત્રિસન્ધ્યા ત્રિગુણાધ્યક્ષા ત્રિમૂર્તિઃ ત્રિપુરાન્તકી ।
ત્રિનેત્રવલ્લભા ત્ર્યક્ષા ત્રયી ત્રાણપરાયણા ॥ ૧૧૩॥

તારણા તારિણી તારા તારાપરિકલાવૃતા ।
તારાત્મિકા તારજપા તુરિતાઢ્યા તરુત્તમા ॥ ૧૧૪॥

તૂર્ણપ્રસાદા તૂણીરધારિણી તૂર્ણસંસ્કૃતા ।
તોષિણી તૂર્ણગમના તુલાહીનાઽતુલપ્રભા ॥ ૧૧૫॥

તરઙ્ગિણી તરઙ્ગાઢ્યા તુલા તુન્દિલપુત્રિણી ।
તનૂનપાત્ તન્તુરૂપા તારાઙ્ગી તન્ત્રરૂપિણી ॥ ૧૧૬॥

તારકારિઃ તુઙ્ગકુચા તિલકાલિઃ તિલાર્ચિતા ।
તમોપહા તાર્ક્ષ્યગતિઃ તામસી ત્રિદિવેશ્વરી ॥ ૧૧૭॥

તપસ્વિની તપોરૂપા તાપસેડ્યા ત્રયીતનુઃ ।
તપઃફલા તપસ્સાધ્યા તલાતલનિવાસિની ॥ ૧૧૮॥

તાણ્ડવેશ્વરસમ્પ્રીતા તટિદીક્ષણસમ્ભ્રમા ।
તનુમધ્યા તનૂરૂપા તળિભાનુઃ તટિત્પ્રભા ॥ ૧૧૯॥

સદસ્યા સદયા સર્વવન્દિતા સદસત્પરા ।
સદ્યઃપ્રસાદિની સુધીઃ સચ્ચિદાનન્દરૂપિણી ॥ ૧૨૦॥

સરિદ્વેગા સદાકારા સરિત્પતિવસુન્ધરા ।
સરીસૃપાઙ્ગાભરણા સર્વસૌભાગ્યદાયિની ॥ ૧૨૧॥

સામસાધ્યા સામગીતા સોમશેખરવલ્લભા ।
સોમવક્ત્રા સૌમ્યરૂપા સોમયાગફલપ્રદા ॥ ૧૨૨॥

સગુણા સત્ક્રિયા સત્યા સાધકાભીષ્ટદાયિની ।
સુધાવેણી સૌધવાસા સુજ્ઞા સુશ્રીઃ સુરેશ્વરી ॥ ૧૨૩॥ (સુધાવાણી)

કેતકીકુસુમપ્રખ્યા કચનિર્જિતનીરદા ।
કુન્તલાયિતભૃઙ્ગાલિઃ કુણ્ડલીકૃતકૈશિકી ॥ ૧૨૪॥

સિન્દૂરાઙ્કિતકેશાન્તા કઞ્જાક્ષી સુકપોલિકા ।
કનત્કનકતાટઙ્કા ચમ્પકાકૃતિનાસિકા ॥ ૧૨૫॥ (ચલત્કનક)

નાસાલઙ્કૃતસન્મુક્તા બિમ્બોષ્ઠી બાલચન્દ્રધૃત્ ।
કુન્દદન્તા ત્રિનયના પુણ્યશ્રવણકીર્તના ॥ ૧૨૬॥

કાલવેણી કુચજિતચકોરા હારરઞ્જિતા ।
કરસ્થાઙ્ગુલિકા રત્નકાઞ્ચીદામવિરાજિતા ॥ ૧૨૭॥

રત્નકિઙ્કિણિકા રમ્યનીવિકા રત્નકઞ્ચુકા ।
હરિમધ્યાઽગાધપૃષ્ઠા કરભોરુઃ નિતમ્બિની ॥ ૧૨૮॥

પદનિર્જિતપદ્માભા ઊર્મિકારઞ્જિતાઙ્ગુલિઃ ।
ગાઙ્ગેયકિઙ્કિણીયુક્તા રમણીયાઙ્ગુલીયુતા ॥ ૧૨૯॥

માણિક્યરત્નાભરણા મધુપાનવિશારદા ।
મધુમધ્યા મન્દગતા મત્તેભસ્થાઽમરાર્ચિતા ॥ ૧૩૦॥

મયૂરકેતુજનની મલયાચલપુત્રિકા ।

પરાર્ધભાગા હર્યક્ષવાહના હરિસોદરી ॥ ૧૩૧॥

હાટકાભા હરિનુતા હંસગા હંસરૂપિણી ।
હર્ષરૂપા હરિપતિઃ હયારૂઢા હરિત્પતિઃ ॥ ૧૩૨॥ (હર્ષપ્રદા)

સર્વગા સર્વદેવેશી સામગાનપ્રિયા સતી ।
સર્વોપદ્રવસંહર્ત્રી સર્વમઙ્ગલદાયિની ॥ ૧૩૩॥

સાધુપ્રિયા સાગરજા સર્વકર્ત્રી સનાતની ।
સર્વોપનિષદુદ્ગીતા સર્વશત્રિનિબર્હિણી ॥ ૧૩૪॥

સનકાદિમુનિસ્તુત્યા સદાશિવમનોહરા ।
સર્વજ્ઞા સર્વજનની સર્વાધારા સદાગતિઃ ॥ ૧૩૫॥

સર્વભૂતહિતા સાધ્યા સર્વશક્તિસ્વરૂપિણી ।
સર્વગા સર્વસુખદા સર્વેશી સર્વરઞ્જિની ॥ ૧૩૬॥

શિવેશ્વરી શિવારાધ્યા શિવાનન્દા શિવાત્મિકા । (સર્વેશ્વરી)
સૂર્યમણ્ડલમધ્યસ્થા શિવા શઙ્કરવલ્લભા ॥ ૧૩૭॥

સુધાપ્લવા સુધાધારા સુખસંવિત્સ્વરૂપિણી ।
શિવઙ્કરી સર્વમુખી સૂક્ષ્મજ્ઞાનસ્વરૂપિણી ॥ ૧૩૮॥

અદ્વયાનન્દસંશોભા ભોગસ્વર્ગાપવર્ગદા ।
વિષ્ણુસ્વસા વૈષ્ણવાખ્યા વિવિદાર્થવિનોદિની ॥ ૧૩૯॥

ગિરિજા ગિરીશપ્રીતા શર્વાણી શમદાયિની ।
હૃત્પદ્મમધ્યનિલયા સર્વોજ્ઞપ્તિઃ સ્વરાત્મિકા ॥ ૧૪૦॥

તરુણી તરુણાર્કાભા ચિન્ત્યાચિન્ત્યસ્વરૂપિણી ।
શ્રુતિસ્મૃતિમયી સ્તુત્યા સ્તુતિરૂપા સ્તુતિપ્રિયા ॥ ૧૪૧॥

ૐકારગર્ભા હ્યોઙ્કારી કઙ્કાલી કાલરૂપિણી ।
વિશ્વમ્ભરી વિનીતસ્થા વિધાત્રી વિવિધપ્રભા ॥ ૧૪૨॥

શ્રીકરી શ્રીમતી શ્રેયઃ શ્રીદા શ્રીચક્રમધ્યગા ।
દ્વાદશાન્તસરોજસ્થા નિર્વાણસુખદાયિની ॥ ૧૪૩॥

સાધ્વી સર્વોદ્ભવા સત્ત્વા શ્રીકણ્ઠસ્વાન્તમોહિની ।
વિધાતનુઃ મન્ત્રતનુઃ મદનોદ્યાનવાસિની ॥ ૧૪૪॥

યોગલક્ષ્મીઃ રાજ્યલક્ષ્મીઃ મહાલક્ષ્મીઃ સરસ્વતી ।
સદાનન્દૈકરસિકા બ્રહ્મવિષ્ણ્વાદિવન્દિતા ॥ ૧૪૫॥ (બ્રહ્મવિષ્ણ્વોંશવન્દિતા)

કુમારી કપિલા કાલી પિઙ્ગાક્ષી કૃષ્ણપિઙ્ગલા ।
ચણ્ડઘણ્ટાઃ મહાસિદ્ધિઃ વારાહી વરવર્ણિની ॥ ૧૪૬॥

કાત્યાયની વાયુવેગા કામાક્ષી કર્મસાક્ષિણી ।
દુર્ગાદિવી મહાદેવી આદિદેવી મહાસના ॥ ૧૪૭॥

મહાવિદ્યા મહામાયા વિદ્યાલોલા તમોમયી ।
શઙ્ખચક્રગદાહસ્તા મહામહિષમર્દિની ॥ ૧૪૮॥

ખડ્ગિની શૂલિની બુદ્ધિરૂપિણી ભૂતિદાયિની ।
વારુણી જટિની ત્રસ્તદૈત્યસઙ્ઘા શિખણ્ડિની ॥ ૧૪૯॥

સુરેશ્વરી શસ્ત્રપૂજ્યા મહાકાલી દ્વિજાર્ચિતા ।
ઇચ્છાજ્ઞાનક્રિયા સર્વદેવતાનન્દરૂપિણી ॥ ૧૫૦॥

મત્તશુમ્ભનિશુમ્ભઘ્ની ચણ્ડમુણ્ડવિઘાતિની ।
વહ્નિરૂપા મહાકાન્તિઃ હરા જ્યોત્સ્નાવતી સ્મરા ॥ ૧૫૧॥

વાગીશ્વરી વ્યોમકેશી મૂકહન્ત્રી વરપ્રદા ।
સ્વાહા સ્વધા સુધાશ્વમેધા શ્રીઃ હ્રીઃ ગૌરી પરમેશ્વરી ॥ ૧૫૨॥

॥ ૐ ॥

॥ ઇતિ શ્રી સ્કાન્દમહાપુરાણે કોલાપુરમૂકામ્બિકામાહાત્મ્યાખ્યે
ઉપાખ્યાને શ્રી દેવ્યાઃ દિવ્યવરસાહાસ્રનામ સ્તોત્રં શિવમસ્તુ ॥

Encoded by R. Harshananda

*shrI mUkAmbikA divyasahasranAmastotram*

pdf was typeset on December 18, 2022

Please send corrections to *sanskrit@cheerful.com*